# ॥ वैयाकरणसिद्धान्तकौमुदी ॥

## अच्सन्धिप्रकरणम् (६)

०१.०९.२०१०

# पुनरावर्तनम्

- यान्तादेशनिपातनम्
  - क्षय्यजय्यौ शक्यार्थे
  - क्रय्यस्तदर्थे
- लोपः शाकल्यस्य
- आद्गुणः

# ७०. उरण् रपरः (१.१.५१)

- पदत्रयम् । उः, अण्, रपरः ।
- उः = ऋकारस्य (पितृ – पितुः, तद्वत् ऋ – उः ) – षष्ठी = ऋकारस्य स्थाने
- रपरः – रप्रत्याहारः = रेफपरः, लकारपरो वा ।
- ऋ इति त्रिंशतः संज्ञा इत्युक्तम् (ऋऌवर्णयोः मिथः सावर्ण्यं वाच्यम् । ऋ – १८ + ऌ – १२), तत्स्थाने यः अण् सः रपरः सन्नेव प्रवर्तते ।
- तत्रान्तरतम्यात् 'कृष्णर्द्धिः' इत्यत्र अर् । 'तवल्कारः' इत्यत्र 'अल्' ।

- कृष्ण + ऋद्धिः - कृष्ण् अ ऋ द्धिः - ???
- स्थानी – अकारः (कण्ठः), ऋकारः (मूर्धा)
- आदेशः – अर् (कण्ठः+मूर्धा), एकारः (कण्ठतालु), ओकारः (कण्ठोष्ठम्)
- कृष्ण + ऋद्धिः - कृष्ण् अ ऋ द्धिः - कृष्ण् अर् द्धिः - कृष्णर्द्धिः

- तव+ऌकारः - तव् अ ऌ कारः - तव् अल् कारः - तवल्कारः
- स्थानी – अकारः (कण्ठः), ऌकारः (दन्ताः)
- आदेशः – अल् (कण्ठः+दन्ताः), एकारः (कण्ठतालु), ओकारः (कण्ठोष्ठम्)

# कृष्णर्द्धिः

| | | | | |
|---|---|---|---|---|
| कृष्ण् | अ | र् | द् | धिः |
| | अच् | रेफः | यर् | |
| कृष्ण् | अ | र् | द् द् | धिः ('अचो रहाभ्यां |

द्वे' इति वा द्वित्वम्)

कृष्णर्द्धिः – कृष्णर्द्द्धिः

# ७१. झरो झरि सवर्णे (८.४.६५)

- पदत्रयम् । 'हलो यमां यमि लोपः' इत्यतः हलः इति, लोपः इति च अनुवर्तते । 'झयो होऽन्यतरस्याम्' इत्यतः अन्यतरस्याम् इत्यनुवर्तते च ।
- हलः – पञ्चमी = हल्-वर्णात् परस्य
- झरः – षष्ठी = झर्-वर्णस्य स्थाने
- सवर्णे झरि – सप्तमी – सवर्णसंज्ञके झर्-वर्णे परे
- लोपः – प्रथमा = विधेयः = लोपः स्यात् ।
- हलः परस्य झरः लोपो वा स्यात् सवर्णे झरि ।

कृष्ण र् द् ध् इः

हल् झर् सवर्णः झर्

कृष्ण र् ध् इ

कृष्णर्धिः

कृष्ण र् द् द् धिः

हल् झर् सवर्णः झर्

कृष्ण र् द् धिः

कृष्णर्द्धिः

- द्वित्वाभावे लोपे सति एकधम् (कृष्णार्धिः)
- असति लोपे, द्वित्वलोपयोर्वा द्विधम् (कृष्णार्द्धिः)
- सति द्वित्वे लोपे चासति त्रिधम् (कृष्णार्द्द्धिः)

| तवल्कारः | | | |
|---|---|---|---|
| तव | ल् | क् | आरः |
| | यण् | मय् | |
| तव | ल् | क् क् | आरः |

(यणो मयो द्वे वाच्ये)

| तवल्कारः | | | | |
|---|---|---|---|---|
| तव् | अ | ल् | क् | आरः |
| | अच् | यर् | न अच् | |
| तव् | अ | ल् ल् | क् | आरः |

(अनचि च)

# ७२. वृद्धिरेचि (६.१.८८)

- पदद्वयम् । वृद्धिः, एचि ।
- 'आद्गुणः' इत्यस्मात् 'आत्' इति अनुवर्तते । 'एकः पूर्वपरयोः' इत्यधिक्रियते ।
- आत् – पञ्चमी = अवर्णात् परस्य
- एचि – सप्तमी = एचि परे
- वृद्धिः – प्रथमा = विधेयः = वृद्धिः स्यात्
- एकः पूर्वपरयोः = एकादेशः
- आदेचि परे वृद्धिः एकादेशः स्यात् ।
- गुणापवादः ।

अपवादः – येन नाप्राप्ते यो विधिरारभ्यते स तस्य बाधको भवति ।

कृष्ण +एकत्वम्

कृष्ण् अ ए कत्वम्

अवर्णः अच् / एच्

गुणः / वृद्धिः?

अपवादत्वात् वृद्धिः

कृष्ण् अ ए कत्वम्

अवर्णः एच्

वृद्धिः

कृष्ण् ऐ कत्वम्

कृष्णैकत्वम्

- गङ्गा+ओघः – गङ्ग् आ ओ घः - गङ्ग् औ घः - गङ्गौघः
- देव+ऐश्वर्यम् – देव् अ ऐ श्वर्यम् - देव् ऐ श्वर्यम् - देवैश्वर्यम्
- कृष्ण+औत्कण्ठ्यम् – कृष्ण् अ औ त्कण्ठ्यम् - कृष्ण् औ त्कण्ठ्यम् - कृष्णौत्कण्ठ्यम्

# ७३. एत्येधत्यूठ्सु (६.१.८९)

- एकमेव पदम् । एति-एधति-ऊठ्सु । 'आद्गुणः' इत्यतः 'आत्' इति, 'वृद्धिरेचि' इत्यतः 'वृद्धिः' इति, 'एचि' इति च अनुवर्तते ।
- आत् – पञ्चमी = अवर्णात्
- एत्येधत्यूठ्सु – सप्तमी = एतेषु परेषु
- वृद्धिः – प्रथमा = विधेयः
- एकः पूर्वपरयोः = एकादेशः स्यात्

- एति = 'इण्' गतौ धातुः । एधति = 'एध' वृद्धौ धातुः । 'एचि' इति अनुवृत्तम् अनयोः विशेषणम् । एजादौ इण् धातौ एध धातौ च परे इत्यर्थः।
- ऊठ् = 'वाह ऊठ्' इति सूत्रेण विहितं सम्प्रसारणम् ।
- अवर्णाद् एजाद्योः एत्येधत्योः ऊठि च परे वृद्धिरेकादेशः स्यात् ।

उप+एति

उप् अ ए ति

अवर्णः एजादिः इण्धातुः

वृद्धिः

उप् ऐ ति

उपैति

उप + एधते

उप् अ ए धते

अवर्णः एजादिः एधधातुः

वृद्धिः

उप् ऐ धते

उपैधते

प्रष्ठ + ऊहः

प्रष्ठ् अ ऊ हः

अवर्णः ऊठ्

वृद्धिः

प्रष्ठ् औ हः

प्रष्ठौहः

- परररूप-गुणापवादः । उपैति, उपैधते इत्यनयोः 'एङि पररूपम्' इति प्राप्तस्य पररूपस्य अपवादः । प्रष्ठौहः इत्यत्र 'आद्गुणः' इत्यस्य अपवादः ।
- एजाद्योः किम्? उपेतः । मा भवान् प्रेदिधत् ।
- उपेतः = उप+इतः (लट्, प्रथमपुरुषः, द्विवचनम् )
- मा प्रेदिधत्
- एधधातोः णिजन्तस्य लुङि प्रथमपुरुषैकवचनम् । 'न माङ्योगे' इति आडागमनिषेधः ।
- प्र + इदिधत्

# अक्षादूहिन्यामुपसंख्यानम् (वा)

- अक्ष+ऊहिनी = अक्षौहिनी = अक्षौहिणी
- गुणापवादः

# स्वादीरेरिणोः (वा)

- पदद्वयम् । स्वाद् ईर-ईरिणोः । 'वृद्धिरेचि' इत्यतः 'वृद्धिः' इत्यनुवर्तते ।
- स्वात् – पञ्चमी = स्वशब्दात्
- ईर-ईरिणोः – सप्तमी = एतयोः परयोः
- वृद्धिः – प्रथमा = विधेयः
- स्वशब्दाद् ईरशब्दे ईरिन्-शब्दे च परे वृद्धिः एकादेशः स्यात् ।
- ईर गतौ । भावे घञ् – ईरः । स्वच्छन्दं गमनम् इत्यर्थः ।
- ईर गतौ । ताच्छील्ये णिनिः – ईरिन्, तस्य स्त्रियाम् ईरिणी । स्वच्छन्दम् ईरितुं शीलमस्याः इत्यर्थः ।

स्व+ईर

स्व् अ ई र

स्व् ऐ र

स्वैरः

स्व+ईरिणी

स्व् अ ई रिणी

स्व् ऐ रिणी

स्वैरिणी